
# Contribution of WOMEN to Sanskrit, Pali and Prakrit Literature

*Prof. Hansaben Hindocha Felicitation Volume*



या देवी सर्वभूतेषु विद्यारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥


Chief Editors
**Dr. Gautam Patel, Dr. Manibhai I. Prajapati**

Editor
**Manibhai K. Prajapati**



**Professor Hansaben Hindocha Abhivadan Samiti**
Gandhinagar 2016



Scanned with CamScanner



Scanned with CamScanner

Publisher :
Manibhai K. Prajapati
Co-ordinator
Professor Hansaben Hindocha Abhivadan Samiti
A/8, Kadi Sarva Vishwavidyalaya Staff Quarters
L. D. R. P. Engineering College Campus,
Sector-15, Gandhinagar-382015, Gujarat, India

First Edition : 2016

Price : ₹ 1250

Pages : XVI + 592

ISBN : 978-81-87471-95-0

**Distributors**

**Standard Publishers (India)**
205, Kirán Mension,
4834/34, Main Ansari Road
Daryaganj, New Delhi-110002
Tel. 011-23272334; M. 09871009093
email : standardpublishersindia@gmail.com
mkvsr9@gmail.com

**Homi Books**
8, Bhagvati Nagar Society,
Gayatri Mandir Road, Highway,
Mehsana-384002
M. 94273 78456
email : homibooks@gmail.com

Printer :
**Shivkrupa Offset Printers**
3, J. K. Block, Ravi Estate, Opp. B.R.T.S. Gurudwara Bus Stop,
Dudheshwar Road, Dudheshwar, Ahmedabad-380 004

Scanned with CamScanner

# ॥ पण्डिताक्षमारावसाहित्याध्ययनम् ॥

डॉ. ललित पटेल

भारतीयस्वतन्त्रताऽऽन्दोलने एवं साहित्यसजनि समरूपेण योगदानं विदधाना अक्षयमोदमूर्तिः पण्डिता क्षमाराव आधुनिकसंस्कृतकवयित्रिषु संस्कृतविद्वत्सु विशिष्टं स्थानमाधत्ते स्वकाव्यप्रतिभया । डॉ. कपिलदेव-द्विवेदीमहोदयेनाह-

प्राच्यं प्रतीच्यं समुपास्य शास्त्रं गद्यं च पद्यं तनुतेऽनवद्यम् ।
कथाप्रबन्धे रूचिमादधाना 'क्षमा' क्षमेवाक्षयमोदमूर्तिः ॥'

महाराष्ट्रप्रान्तान्तर्गत-सामन्तवाडीजनपदस्थबांबोलीनामके ग्रामे १८९० तमे वर्षे जुलाईमासस्य चतुर्थे दिनाङ्के तस्याः जन्मऽभवत् । पिता शङ्करपाण्डुरङ्गः संस्कृतज्ञः सन्नपि लैटिन-जर्मन-अंग्रेजी इत्यादिभाषास्वपि विद्वान् एवं पूनास्थडेक्कनमहाविद्यालयस्याध्यापक आसीत् । यदा क्षमा त्रिवर्षीयाऽऽसीत् तदैव तस्याः पिता दिवंगतः । अद्वितीय प्रतिभासम्पन्नक्षमायाः शैशवम् अतीव कष्टेष्वभावेषु चातीतम् । प्राप्ते दशमे संवत्सरे मेधाविनी सा संस्कृत-अंग्रेजीकाव्यकर्मणि कुशलाऽभूत् । मुम्बईनगरे पितामहरामचन्द्रनायकसन्निधौ वासं कुर्वती परिश्रमी-अध्ययनरता बालिकेयं कथंचिदपि विल्सनमहाविद्यालये प्रविश्य गुरोः महामहोपाध्यायपाण्डुरङ्गवामन-काणेमहोदयस्य मार्गदर्शनमवाप । विंशतिवर्षीया सा स्नातकात् पूर्वं हि चिकित्सक-डॉ. राघवेन्द्ररावेण सह विवाहिता । पाणिग्रहणानन्तरं हि क्षमाराव संस्कृतमतिरिच्य फ्रैन्च-जर्मनादिभाषाणामभ्यासं चकार । एवञ्च पाश्चात्यसङ्गीतसाहित्यादिनि परिशीलयामास । तत्रैव प्राच्यविद्यावित् सिल्वां लेव्ही, अंग्रेजी साहित्यकार-सोमरसेट मॉम इत्यादीनां पाश्चात्यविदुषाञ्च संपर्को जातः । तेषां प्रेरणयैव तस्याः कविव्यापारतरुः फलितः । स्वातन्त्र्यसङ्ग्रामप्रत्यक्षद्रष्टी पं. क्षमाराव गुजराते महात्मागान्धीसाबरमती-आश्रमे उवास । अत एव तस्याः साहित्यरचनासु राष्ट्रप्रेम दरीदृश्यते ।

१९३८ तमे वर्षे अयोध्यास्थ-संस्कृतकल्याणसंस्थया 'पण्डिता' इत्युपाधिना विभूषितेयं विदुषी । 'शङ्करजीवनाख्यानम्' इत्यनया स्वकीयरचनया साहित्यचन्द्रका इत्युपाधिरपि पपौ ।

विषयदृष्ट्या पण्डिताक्षमारावरचनाः त्रिविधाः वर्तन्ते (१) सामाजिकरचनाः (२) देशभक्तिविषयकरचनाः (३) भक्तिविषयकरचनाश्च । यथा 'कथापञ्चकम्' सामाजिकरचना, ग्रामज्यातिरिति देशभक्तिविषयकरचना, श्रीरामदासचरितमिति भक्तिविषयकरचना । पं. क्षमारावरचितकाव्यरचनाः इत्थं सन्ति । (१) सत्याग्रहगीता (२) कथापञ्चकम् (३) शङ्करजीवनाख्यानम् (४) मीरालहरी (५) उत्तरसत्याग्रहगीता (६) श्रीतुकारामचरितम् (७) श्रीरामदासचरितम् (८) ग्रामज्योतिः (९) श्रीज्ञानेश्वरचरितम् (१०) स्वराज्यविजयम् ।

(१) सत्याग्रहगीता पण्डितक्षमारामकाव्यरचना अन्यतमा चतुस्संस्करणप्रकाशयित्वात् । भगवद्गीतेवाष्टादशाध्याय-निबन्धायामस्यां रचनायां सत्याग्रहान्दोलनपूर्वतर्कमहात्मागान्धिमहाभागानामुपदेशानां सिद्धान्तानाञ्च निरूपणं वर्तते । दुष्कृतानां विनाशाय धर्मसंस्थापनाय च भगवदवताररूपेण सात्त्विकगुपोपेतः पुण्यकर्मयुक्तः श्रेष्ठः मनुष्यः यथाऽवतरितवानिति । स्वतन्त्रतासंघर्षप्रत्यक्षीकृतः अनया रचनया कवियित्र्या । अन्ते च मङ्गलम्-



Scanned with CamScanner

Scanned with CamScanner

सत्यं विजयतां लोके मुक्तं भवतु भारतम् ।
नन्दन्तु सुखिनः सर्वे देशजाश्च विदेशजाः ॥[१]

(२) कथापञ्चकम् - संस्कृतपद्यवद्धं पञ्चकथासमन्वितमिदं कथापञ्चकनामकं काव्यं १९३४ तमे वर्षे कर्नाटकहाउस-चित्रावार-मुम्बईतः प्रकाशितम् । तत्र पञ्चकथाः इत्थं वर्तन्ते (१) बालिकोद्वाहसंकटम् (२) गिरिजायाः प्रतिज्ञा (३) हरिसिंहः (४) दन्तकेयूरम् (५) असूयिनी च । बालिकोद्वाहसंकटम् इति पार्वतीनामिकायाः मृतभर्तृकायाः (विधवायाः) कथा ।[३] गिरिजानामिका काचिद् नायिका सूनुहत्याप्रतिशोधनार्थं प्रतिज्ञां करोति' इति विषयमधिकृत्य रचितं काव्यं 'गिरिजायाः प्रतिज्ञा' । हरिसिंहस्तु चरित्रप्रधानं काव्यम् । हरिसिंहः नायकः तस्यैव पितरं दुष्टं राजानं नागसिंहं हन्ति ग्रामजनत्रासमुक्तये । दन्तकेयूरं भावप्रधानं काव्यम् । दन्तकेयूरं विक्रीयऽपि नूतनमुण्यां दधाना आदर्शरूपा निरक्षरा काचिदद्धीवरपत्नी काव्यस्यास्य नायिका वर्तते । असूयिनीकथायां 'रेवा' इति नायिकायाः मुख्यं चरित्रं निरूपितमस्ति ।

(३) शङ्करजीवनाख्यानं सप्तदशोल्लासयुतं कवियित्र्याः पितुः पण्डितशङ्करस्य जीवनचरितं वर्तते । ई १९३९ तमे न्यू-मरीनलेन-मुम्बईतः प्रकाशितेऽस्मिन् काव्ये ८४० पद्यानि सन्ति ।

(४) मीरालहरी मीराजीवनचरितनिबद्धं श्रीतिकाव्यं विद्यते । अस्य शार्दूलविक्रीडितछंदोबद्धस्य काव्यस्य द्वौ खण्डौ स्तः पूर्वखण्डः उत्तरखण्डश्च ।

(५) उत्तरसत्याग्रहगीता सत्याग्रहेतिहासप्रस्तुत्री खिष्टाब्द १९४४ तमे मरीनलेनमुम्बईतः प्रकाशितं सर्वोत्तमसंस्कृतकाव्यरचना ।

(६) श्रीतुकारामचरितं नवसर्गात्मकं ४३५ श्लौकैः निवद्धं १९५० खिष्टाब्दे बी. कुलकर्णी-हिन्दीकिताब-मुम्बईद्वारा प्रकाशितं महाराष्ट्रस्थसंततुकारामजीवनस्येतिवृत्तं प्रस्तौति काव्यमिदम् ।

(७) श्रीरामदासचरितं द्वादशसर्गात्मकं महाकाव्यमस्ति । महाराष्ट्रस्य शिवराजगुरोः समर्थस्वामिरामदासस्य जीवनोपरि १९४३ खिष्टाब्दे प्रकाशितं वर्तते ।

(८) आधुनिकशैल्या विरचितं 'ग्रामज्योतिः' कथात्रयसमन्वितं राष्ट्रभक्त्युपेतं १९४८ तमे वर्षे भूपेन्द्र-वसु-एवन्यूकोलकत्तातः प्रकाशितं काव्यम् । तत्र तिस्रः कथाः (१) रेवाया कथा (२) कटुविपाकः (३) वीरभा च ।

(९) श्रीज्ञानेश्वरचरितम् अष्टसर्गात्मकं, ४०६ श्लोकैः निबद्धं योगीज्ञानेश्वरचरितोपेतं खिष्टाब्द १९५५ तमे प्रकाशितं काव्यं वर्तते ।

(१०) स्वराज्यविजयं तु ५४ अध्यायैः, १७४० अनुष्टव्वृत्तैश्च १९६२ तमे वर्षे प्रकाशितं गान्धीजीवनवृत्तेन सार्धं स्वातन्त्र्यसंग्रामं प्रदर्शयति ।

पण्डितक्षमारावरचनासु शाश्वतमूल्यैः सह आधुनिकमूल्यानि यथा एकता-देशभक्ति-असमानता-राष्ट्ररक्षादिनि दृग्गोचरीभवन्ति । उक्तं च-

अहिंसा सत्यम स्तेयं ब्रह्मचर्यापरिग्रहौ ।
स्वदेशव्रतनिष्ठा च निर्भाती रूचिसंयम : ॥[५]

सर्वजातिवर्गसमभावः प्रदर्शितो वर्तते कवयित्र्या स्वरचनासु । यथा-

शुद्रो वा ब्राह्मणो वापि क्षत्रियो वा कृषीवलः ।
देवदृष्ट्या समाः वर्षे विकृतिस्तु नरोद्भवा ।[६]

मूल्यानामेतेषां निरूपणं कृत्वा राजनैतिक-सामाजिक-धार्मिकजागरणाय काव्यात्मकशङ्खनिःकृतः ।



Scanned with CamScanner

बालविवाहादिसामाजिकसमस्यानां सामन्तवादिराजकीयसमस्यानां च प्रभावो वरिवर्ति काव्यरचनासु तस्याः ।

अतिबाल्यदशायां सा गुरुभिः पर्याणाय्यत ।
शारदीयविधनात् प्राग् बाल्योद्वाहनिरोधकात् ॥[७]

क्षमारावकृतिषु शब्दार्थालङ्काराणां प्रयोगो वर्तते । मीरालहर्यां प्रेयस्-अलङ्कारो विशेषरूपेण प्रयुक्तः-

आसीदत्र मनरोमः किल मम प्रेमाश्रयो मण्डपः
स्फूर्जद्दिव्यसुगन्धहानिकुसुमः प्रच्छायशीतान्तरः ।
यत्रादौ रमणीयकैतवजुषा नीता मम प्रेयसा
जाता पाणिसरोजलालितवपुः सर्वांगकम्पाकुला ॥[८]

रूपक-उपमा-सन्देह-उत्प्रेक्षा-विभावना-विशेषोक्ति-यथासंख्य-अर्थान्तन्यास-भाविकादि-अलङ्काराः प्रयुक्ताः स्वरचनासु क्षमारावमहोदयया । यथा -

नितान्तं कम्पमानांगी कथमप्यथ रेविका ।
कर्षन्तीव निजात्मानं द्वारभूमिं शनैरगात् ॥[९]

महोदयायाः सर्वप्रियतरं छन्दस्तु अनुष्टुप् । सर्वाधिकरचनाः अनुष्टुपवृत्त एव वर्तन्ते । कथापञ्चक-ग्रामज्योति-सत्याग्रहगीता-शङ्करजीवनाख्यानादिग्रन्थास्तु अनुष्टुब्वृत्ते रचिताः सन्ति । किन्तु 'मिरालहरी' शार्दूलविक्रीडितवृत्ते गेयं काव्यम् । श्रीरामदासचरिते इन्द्रवज्रा-मालिनी-वसन्ततिलका-हरिणी-उपेन्द्रवज्रा-रथोद्धता-द्रुतविलम्बितादिछन्दसां प्रयोगः विद्यते । पुनश्च शिखरिणी-छन्दसि रचितं वर्तते श्रीतुकारामचरितम् । एवं यथास्थानं छन्दसां बाहुल्यमपि प्रतिभाति क्षमारावरचनासु ।

क्षमारावभाषा अत्यन्तसरला लोकव्यावहारिकी असमासा स्वल्पसमासा च क्वचिद्दृश्यते । रोष-दैन्य-ग्लानि-करुणादिभावानुगुणं भाषानिरूपणे स्वाभाविकी अभिव्यक्तिः वर्तते कवयित्र्याः, नास्ति तत्र काचिद्विप्रतिपत्तिः । भाषासुदृढीकरणाय क्वचिद् सुभाषितानां, लोकोक्तीनां लौकिकन्यायानां वाग्व्यवहाराणाञ्च प्रयोगः कृतः । भावानुरूपा उपदेशात्मिकी, नीतियुक्ता, मानवीयगुणोपेता च क्षमारावभाषाशैली ।

## ॥ सन्दर्भाः ॥


१. कवयित्री कण्ठाभरणम्, पृ. २२७
२. सत्याग्रहगीतायामष्टादशतमेऽध्याये
३. बभूव पार्वती नाम कुलीना गतभर्तृका ।
दास्यकर्म प्रकुर्वाणा देवरस्य निकेतने ॥ - बालिकोद्वाहसंकटम् - कथापञ्चकम्, श्लोकः १
४. प्रतिज्ञा सिद्धिमीप्सन्त्या वैर निर्यातनं प्रति ।
शोकावेगमयी तस्या आसीत्यद्या हि दुःस्थितिः ॥
५. सत्याग्रहगीता, ४, पृ. २१
६. तत्रैव, २/११, पृ. ११
७. बालिकोद्वाहसंकटम्, कथापञ्चकम्, पृ-८
८. मीरालहरी, श्लोकः ९, पृ. ४१
९. असूयिनी, श्लोकः - १७८, पृ.-८४



Dr. Lalit Patel
Asst. Professor
Shree Somnath Sans
University Sanchal
Sanskrit College
Veraval

[डॉ. ललित पटेलः, आसि. प्रोफेसर, श्री सोमनाथसंस्कृतयुनिवर्सिटी- सञ्चालित-संस्कृतकॉलेज,



Scanned with CamScanner

Scanned with CamScanner